National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 250-251
© 2025 NJHSR
www.sanskritarticle.com

**डा. नीरजभारद्वाजः**
बीशा, कण्डाघाटः,
सोलनम्, हि.प्र. -173234

**Correspondence:**
**डा. नीरजभारद्वाजः**
बीशा, कण्डाघाटः,
सोलनम्, हि.प्र.- 173234

# श्रीमद्भगवद्गीतायाः सिद्धान्तानां शैक्षिकक्षेत्रे उपादेयता

**डा. नीरजभारद्वाजः**

**"गीतासुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृता॥**

श्रीमद्भगवद्गीतायाः वैशिष्ट्यमनादि कालादेव सर्वैरपि सूरिभिः प्रतिपाद्यते। यतः इहैव सा विचारसरणिः यया समग्रमपि जगतीतलं स्वज्ञानतर्कप्रमाणवादादिभिः आवृतं वर्तते, यस्माच्च च समग्रमपि विश्वं मुक्तकण्ठेन ग्रन्थस्यास्य गुणगानं विधातुं समुद्युक्तो वरीवर्ति। विविधाः तत्त्ववेत्तारः, न्यायनिर्णेतारः, शास्त्रज्ञातारश्च अमुं ग्रन्थं न केवलं ज्ञानराशिरूपेण अङ्गीकुर्वन्ति अपि तु अत्यन्तं श्रद्धधाना सन्तो परमप्रामाणिकसत्यरूपेण पूजयन्ति। भगवद्गीतायामस्यां विविधतात्त्विकविमर्शाणां सूक्ष्मावलोकनेन जन्मतः मृत्युपर्यन्तं केन कीदृशं कर्माचरणीयम्, आचारव्यवहारश्च अस्माकं कीदृशो भवेद्, कः कथं संसिद्धिं लभते इत्यादिकं सर्वमपि उपनिबद्धम्। अतः प्रशासनं कथं कर्त्तव्यम्, के गुणाः प्रबन्धके अपेक्षिताः, कथं शिक्षाप्रक्रिया साफल्यमधिगच्छेत् इत्याद्याः नैके विचाराः भगवद्गीतायाः सूक्ष्मावलोकनेन स्फुटतां यान्त्येव, ये च विचाराः नितरां वैज्ञानिकताम् आवहन्ति एव।

कस्मिंश्चिदपि क्षेत्रे प्रशासनम् एका सुव्यवस्थिता प्रक्रिया भवति। विशेषतः शैक्षिकप्रशासनसञ्चालने काचित् कला अपेक्षत एव। यतः शैक्षिकप्रशासनप्रक्रिया एका क्रमबद्धा गतिशीला च भवति यत्र वैज्ञानिकनियमाधारेण निरीक्षणं, पर्यवेक्षणं मूल्याङ्कनम् च भवति। आधुनिककाले शैक्षिकप्रशासने कौशलसम्पादनार्थं नियोजनम्, सञ्चालनम्, सङ्घटनम्, मूल्याङ्कनादयः विविधाः वैज्ञानिकाः आयामाः विशेषेण अधिगन्तव्याः भवन्ति। शैक्षिकप्रशासनस्य आधारो नाम प्रशासकः एव। कीदृशः प्रशासकः स्यात् इति निदर्शनं प्राप्यते भगवद्गीतायां सात्त्विककर्तुः प्रतिपादनसन्दर्भे। तद्यथा-

**मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।**
**सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते ॥**[1]

इत्थं प्रशासनिकः यदि अनहङ्कारी, धैर्यवान्, उत्साहीत्यादि गुणोपेतः भवति चेत् निश्चयेन हि प्रशासनं सफलीभवेदेव। शैक्षिकप्रशासनप्रक्रियायां केचन स्तराः प्रतिपादिताः वर्तन्ते शिक्षाविद्भिः । तद्यथा –

### १. सङ्घटनम् – (Organization)

शैक्षिकप्रशासनस्य मानविकभौतिकभेदाभ्यां द्विधा सङ्घटनं विभाज्यते। मानविकांशे शिक्षक-छात्र-कर्मकर-प्राचार्य-शिक्षासमितयश्चान्तर्भवन्ति। भौतिकप्रभेदे तु विद्यालयभवनम्-उपस्कर-पुस्तकालय-क्रिडाङ्गणादिकम्। भेदेऽपि उत्तमोत्तमः सम्बन्धः स्थापितः न भवति चेत् शैक्षिकप्रशासनं न कदापि सुदृढं तिष्ठेत्। अत एवोक्तं गीतायाम् –

**"स्वे-स्वे कर्मण्यभिरताः संसिद्धिं लभते नराः"**[2]

अपरं च –

**अन्यो अन्यमभि हर्यत्, वत्सं जारमिवाधन्या"**[3]

एवं शिक्षाप्रक्रियायाः सर्वाण्यपि अङ्गानि यदि स्वकार्याणि सुष्ठु विदधति उत् सङ्घटने क्रियमाणस्य प्रत्येकमपि कर्मणः निर्णयः सर्वहितसाधकः भवेच्चेत् शैक्षिकप्रशासनं स्वतः एव सुव्यवस्थितं भवति।

**१. नियोजनम् – (Planning)**

शैक्षिककार्ययोजनाः सर्वाः अपि सोद्देश्याः, सुनिश्चिताः, परिस्थित्यनुरूपाः च भवितव्याः। प्रशासकैः विनिर्मिताः इमाः योजनाः सर्वहितसाधिकाः, सर्वापेक्षापूरिकाः, भूत-भविष्य-वर्तमानकालोपयोगिन्यश्च अवश्यं भवेयुः। गीतोक्तिः अत्र अवश्यं स्मर्तव्या। तद्यथा –

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥**[4]

सामान्येन प्रत्येकमपि जनः तस्य स्वभावानुसारं सम्यक् कर्मणि नियोज्यते चेत् कार्ययोजना निश्चयेन सफला भवति।

**२. नियन्त्रणम् – (Controlling)**

शिक्षाक्षेत्रे मानविकानां भौतिकसंसाधनानां च नियन्त्रणस्य महती आवश्यकता दृश्यते। इमानि साधनानि अनियन्त्रितानि चेत् शिक्षा एव लक्ष्यविहिना भूत्वा विपरीतप्रभावं जनयेत्। अतो श्रीमद्भगवद्गीतायां प्रशासनस्य नियन्त्रणमस्मभिः कथं स्थापनीयमिति सुष्ठु प्रतिपादितं वर्तते।

**३. सामञ्जस्यम् – (co-ordination)**

शैक्षिकप्रशासनप्रक्रियायां यावत्पर्यन्तं परस्परं शिक्षक-छात्र-प्रशासकानां मध्ये सामञ्जस्यं न भवति तावत् पर्यन्तं शिक्षाप्रक्रिया सफला न भवेत्। सामञ्जस्यार्थं च क्रोधमोहमदमात्सर्यादयो दुर्गुणाः त्यक्तव्या एव । अतः अवश्यमेव स्मर्तव्यं यत् –

**"क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणशयति ॥**[5]

तस्मात् क्रोध-सम्मोह-अभिमानादि दुर्गुणाः नितरां त्याज्या एव प्रशासकैः।

**४. मूल्याङ्कनम् – (Evaluation)**

विहितकर्मणां मूल्याङ्कनेन स्वोपलब्धेः सीमा ज्ञातुं शक्या एव। अतः काले-काले शैक्षिकपरिस्थितीनां मूल्याङ्कनं विधेयम्।

- **प्रशासकगुणाः –**

शिक्षाशास्त्रिणामभिमते प्रशासनस्य साफल्याय प्रशासके इमे चत्वारः गुणाः अपेक्षिताः एव । तद्यथा –

**१. प्राविधिकज्ञानम् –**

कालचक्रक्रमेण विविधप्रविधिज्ञानम्, नवीनपाठ्यसामग्रिविषयकं, सूचनासम्प्रेषणविषयकं च ज्ञानं प्रशासकस्य नितरां स्यादेव । तदेवोक्तं श्रेष्ठजनानां विषये गीतायां –

**"ज्ञानं विज्ञानमास्तिक्यं ब्राह्मकर्म स्वभावजम् ।"**[6] इति ।

**२. मानविककौशलम् –**

शैक्षिकप्रशासनं सफलयितुं प्रशासके निर्णयस्वीकारक्षमता, विविधमनोस्थितियुक्तजनैः सह व्यवहर्तुं योग्यता, विविधाः समायोजनक्षमताश्च भवेयुः तत् निदर्शनं भवति गीतायाः द्वितीये अध्याये –

**"यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभः।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥"**[7]

वस्तुतः यः धीरः भवति यस्मै च सामान्याः सुखदुःखरागद्वेषशीतोष्णादि क्लेशा न व्यथयन्ति स एव सुसफलः भवति ।

**३. सम्प्रयात्मकं कौशलम् –**

**अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।**
**विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥**[8]

इत्युक्तदिशा समग्रशैक्षिकसंस्थायाः शिक्षासम्बद्धान् सर्वान् उपक्रमान् निर्वतयितुं पूर्वोक्ताः गुणाः नितराम् अपेक्षिता एव ।

**४. व्यक्तित्वम् –**

प्रशासनिकगुणदृष्ट्या प्रशासकः कीदृशः भवितव्यः इति ज्ञातव्यं भगवद्गीतायाः –

**"श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेनाधिगच्छति ॥"**[9]

एवं शिक्षाप्रशासने न केवलं प्रशासकस्य अपि तु छात्र-शिक्षक-कर्मचारिणामपि व्यक्तित्वे विनम्रता, विश्वसनीयता, श्रद्धा, सहभागितादयः गुणाः अवश्यं भवेयुः।

इत्थं प्रशासकः यदि श्रीमद्भगवद्गीतायां प्रतिपादितसिद्धान्तानाम् गुणानां च अनुपालनं कुर्यात् किञ्च शिक्षायाः अधिग्रहिता प्रदाता च श्रद्धावन्तौ स्याताम् तर्हि निश्चयेन शिक्षाप्रशासनञ्च सुव्यवस्थितं सुदृढं च भविष्यति इत्यत्र नास्ति विमतिः इति शम् ।

**पाद टिप्पणी: -**

1. श्रीमद्भगवद्गीता १८ अ. २६ श्लोकः
2. श्रीमद्भगवद्गीता अ.१८ श्लोकसं ४५
3. अथर्ववेद ३.३०.१
4. श्रीमद्भगवद्गीता अ.३ श्लोकसं. ५
5. श्रीमद्भगवद्गीता अ.२ श्लोकसं. ६३
6. श्रीमद्भगवद्गीता अ.१८ श्लोकसं. ४२
7. श्रीमद्भगवद्गीता अ.२ श्लोकसं. १५
8. श्रीमद्भगवद्गीता अ.१८ श्लोकसं. ५३
9. श्रीमद्भगवद्गीता अ.४श्लोकसं.३९